## ।। अथ सप्त पंचाशत्तमोऽध्यायः ।। Chapter-57

वसिष्ठ उवाच :- ततो गच्छेन्नृपश्रेष्ठ बालगौरीं सुविश्रुताम् ।
तस्या दर्शनमात्रेण न दौर्भाग्यमवाप्नुयात् ।। १

कैलाशशिखरे पूर्वमुमया सह शंकरः ।।
क्रीडां चकार भगवान् वनेषूपवनेषु च ।। २

नदीषु देवखातेषु गिरिशृंगेषु सर्वतः ।।
कदाचिदथ विन्ध्यस्य श्रुत्वोपवनमीश्वरात्[1] ।। ३

उत्कण्ठिता महादेवी शम्भुमित्यब्रवीद्वचः ।। ४

देव्युवाच :- देवदेव गिरिं विन्ध्यं मम दर्शय तं प्रभो ।।
सुमेरुस्पर्द्धया वृद्धिं यश्चकार महागिरिः ।। ५

देवदेवउवाच :- त्वं माता जगतां देवि तवादृष्टं न किंचन ।।
लोकेऽस्ति तदपि क्रीडा जगन्मातुस्तवेदृशी ।। ६

वसिष्ठ उवाच :- इत्युक्त्वाऽऽ वृषमारूढः सह गौर्या महेश्वरः ।।
जगाम विन्ध्यमचलं शिखराकृत दिंमुखम्[2] ।। ७

--०--

१ बी श्रुत्वा वर्णनमीश्वरात वर्णनमीश्वरात्, घ ई मीश्वरम्
२ ए दिमुखम्

नर्मदोघशिला पातनादुन्नीत केकिनम् ।।
शाखा हस्ताग्र संलग्न फल पुष्पित तापसम् ।। ८

पक्षि चंचुपुटाघात भ्रष्ट पुष्पचया कृतम् ।। ९

नानाधातु रसाकीर्णि विनराजी विराजितम् ।। ६

शाखाभिपुष्पिताग्राभिरर्चयन्तमिवाम्बरम् ।।
भास्वतोर्भासुराभाभिरुद्दीपित शिलोपलम् ।। १०

बबन्धवाल्दस्य मौक्तिकानीव शीकरान् ।।
मदशीकरवर्षीणि गजयूथानि यत्र वै ।। ११

रेजुरम्बुदजालानि क्रीडन्तीवसमन्ततः ।।
निजं मधु परित्यज्य शिलातल गतं बहु ।। १२

मदस्रुत राजेन्द्राणां पीयते यत्र षाट्पदैः ।।
मत्ताः क्वचन कूजन्ति कोकिलाः क्वापि षाट्पदाः ।। १३

क्वचिन्नृत्यविलासेषु साश्रुपाता शिखण्डिनः ।।
आरावैः पक्षिसंघानां करीन्द्राणां च गर्जितैः ।। १४

-०-

१ बी नर्मदोच्च २ बी शाखा हस्ताग्रसंलीन
३ बी भास्कर सहस्रेण

नर्मदौघ निनदैश्च कीचकानां कलस्वनैः ॥
कृत्वा यजूंषि सामानि समुच्चार्य मुहुर्मुहुः ॥ १५

वंशसंघविघातेषु जुह्वन्तमिव वन्हिषु ॥
तत्र क्रीडं महेशानश्चकार सह कान्तया ॥ १६

वनेषु पुष्पावचयं स्नानं रेवापयःसु च ॥
अथ विन्ध्याटवी नाम दुर्गायाऽअपि दुर्गमा ॥ १७

तत्रागच्छन्महादेवः शिवाया दर्शनार्थवै ॥
परितो मृगतृष्णाभिरावृतां वृक्षकैर्युताम् ॥ १८

ममतासक्तचितानां चितवृत्तिऽमिवान्वहम् ॥
नजलं हृदगतेषु न नदीषु सरःसु च ॥ १९

कुरगाः परिधावन्ति तृष्णाता इव देहिनः ॥
सुचिरं तत्र देवस्य विन्ध्यारण्ये विहारिणः ॥ २०

पिपासातोऽभवद्देवी न जलं प्राप्यते क्वचित् ॥
ततो मूर्धराजस्य दुहिता कलभाषिणी ॥ २१

१ ए मिव
२ ए क्षियिताम्
३ ए तृष्णा
४ ए वक्षावर्मिताप्

देवदेवमुवाचेदमार्दृणा तृषाकुला ।। २२

देव्युवाच :- देवदेव न कुत्रापि दृश्यतेऽत्र जलाशयः ।।
यस्मिन् आकण्ठमाप्लुत्य पीयते शीतलं जलम् ।। २३

देवदेव उवाच:- न कुत्रापि स्वस्थं क्रियते च पयः क्वचित् ।।
विन्ध्याटवी प्रसिद्धेयं भुवि देवनृणामपि ।। २४

इदं गार्गं मनोहारि वारि मूर्ध्नि ममास्ति वै ।।
यदि तृष्णावबाधेत तदिदं पीयतामिति ।। २५

लोके प्रशस्यते नूनं सर्वस्यापि हि सञ्चयः ।।
आपत्काले न सीदन्ति संचितार्थाः शरीरिणः ।। २६

वसिष्ठ उवाच :- इत्युक्ता सा तदा देवी देवदेवेन शम्भुना ।।
तृषा विस्मित सापत्न्याः पपौ वारि जटान्तरात् ।।२७

ततः स्मितमुखो देवः पार्वतीमित्यभाषत ।।
वैलक्ष्यं वर्जयन्नस्या गंगावारिप्रशंसनैः ।। २८

-o-

१ ए यास्मिन्नाकण्ठमाप्ताव्य
२ ए द्रौ ए प्रिये
३ ए न्ना

देवदेवउवाच :- इयमार्तिहरा लोके गंगा पर्वतनन्दिनि ।।
देवमानवसर्पाणां तेन मे शिरसा धृता ।। २६

अपि पापशतैर्युक्ता गंगावारि पिबन्ति ये ।।
न ते विम्यति पापेभ्यस्तेन मेशिरसा धृता ।। ३०

पावनी सुरमर्त्यानां पन्नगानां च पार्वति ।।
देवी गंगा न मिथ्यैतत्तेन मे शिरसा धृता ।। ३१

सोममण्डलमुद्भिद्यश्रीमत्स्यार्क पदच्युता ।।
लोकत्रयं पुनातिस्म तेन मे शिरसा धृता ।। ३२

पितापि तव पावित्र्यं शैलराजो हिमाचल: ।।
लोकेषु गंगया वत्ते तेन मे शिरसा धृता ।। ३३

न गिरिर्न नदी नाब्धिर्न देवा न च देवता ।। ३४

सत्पयस्कायां गंगा या: कलां नार्हन्ति षोडशीम् ।। ३५

वसिष्ठ उवाच:- इत्युक्तवति देवेशे देवी प्रस्फुरिताधरा ।।
विस्फार्यं नयने क्रुद्धा महेशमिदमब्रवीत् ।। ३६

-०-

१ बी मनुष्य मैव
(?) सर्पाणां

देव्युवाच :- हृदि ते यदि सर्वज्ञ सन्ति मन्दाकिनीगुणा: ।
तत्कथं मुखदाक्षिण्यं[१] मयि न क्रियते मन: ।। ३७

पीयते यदि नो वारि तृष्णार्तैरपि देहिभि: ।।
किमन्यं तेन तत्कार्यमिह शंकर कथ्यताम् ।। ३८

देवदेवउवाच :- स्वभाव एव गंगाया मया देवि तवाग्रत: ।।
कथित: प्रस्तुतो[२] मुंच कोपं चण्डि वृथा कृतम् ।। ३९

प्रश्नतो देव्युवाच:- स्वभावेनैव गंगाया प्रशस्यन्ते गुणास्त्वया ।
यदि वक्तासि वैशिष्ट्यात्तत्व: श्रोतुमिह क्षम: ।। ४०

सत्यं शंकर सो गंगा तव चेतसि वर्तते ।
उग्रं तप: करिष्यामि शृणु मे त्वं तपोगतम् ।। ४१

कन्दमूल फलाहारं कुर्वाणा गिरिमूर्धनि ।।
भूर्जत्वचो वसानाच तप्स्येऽहं परमं तप: ।। ४२

वसिष्ठ उवाच:- इत्युक्त्वा गिरिराजस्य तनया प्रियमीश्वरम्[३] ।।
चचालमुनिमान्तं पश्यन्ती पर्वतं प्रति ।। ४३

------

१ बी तत् कथं मम दाक्षिण्यमपि
२ बी कथित: प्रश्नोमुंच ए प्रस्तुतो
३ बी परमेश्वरी ।

अथैकेनैण पातेन पुरा गच्छति पार्वती ।
देवेश्चाटूति :- पश्चादभ्येति देवेश्चाटूनि प्रलपन् बहु ।। ४४
एकेना हुनाथ संप्राप्ता श्रीमालं पार्वती नृप ।
शनैर्जरग्दवारूढः शिवोभ्येति नभस्तले ।। ४५

यज्ञकूप तटे देवी न दूरे कश्यपाश्रमात् ।
स्थितिं कृत्वा परिश्रान्ता सायान्हे समुपाविशत् ।। ४६

ततो विज्ञाय तत्कर्म ययौ सान्त्वनवांछया ।।
बाला रूपधरा देवी लक्ष्मीर्वैकुण्ठवल्लभा ।। ४७

श्रीरूवाच :- कासि कस्यकृतः प्राप्ता कथमेकाकिनी ह्यसि ।
मम सर्वं समाचक्ष्व यदि गोप्यं न विद्यते ।। ४८

पार्वत्युवाच :- बाले किं ते मयाकार्यं विचनानामकोविदे ।
आरूढ-यौवना नार्यो जानन्ति मम भाषितम् ।। ४९

बालोवाच :- केन त्वं दग्धकामेन कामिनि कोपिता भृशम् ।।
अद्य चण्डि त्वया हीनस्तपस्वी किं करिष्यति ।। ५०

-०-

१ बी देवेश्च्चाटूनि- ए श्चटू
२ बी एकेणुना (?) थ सम्प्राप्ता,
३ बी वृत्त
४ बी बालरूपधरा
५ बी वचनात् कोपिता मृशम्

वसिष्ठ उवाच :- इत्युक्ते शिवया देवी प्रत्यक्षाभूद्धरिप्रिया ।
चतुर्भुजा विशालाक्षी गृहीतकमलायुधा ।। ५१

ततो धृति[१] [ए] परां प्राप्य ते उभे लोक मातरौ ।
वक्षसी स्तनसंबाधं पीडयामासतु मुदा[१] ।। ५२

उभे ते लोकशरणं उभे ते लोकवन्दिते ।।
अस्वजेतामतिप्रीत्या प्रीणानाय शरीरिणाम् ।। ५३

अथाययौ महादेव स्तत्र वृद्धोक्षवाहन: ।।
वृत्तं निवेदयामास तदशेषं श्रियं प्रति ।। ५४

प्रीताथ पार्वती देवी सान्त्विता बहुश: श्रिया ।
संयोजित[२] व कर्णा लक्ष्मीमिदमभाषत ।। ५५

पार्वत्युवाच :- तवाहं हृदा देवि ददामि किमिह प्रियम् ।।
यया[३] मे विहितो योग: सह देवेन शम्भुना ।। ५६

न तिष्ठामि विना शम्भुं क्षणमेकमपि क्वचित् ।।
देवोपि न मया हीने धृतिं विन्दति कुत्रचित् ।। ५७

-०-

१ बी पीडयामासतुर्मिथ:

२ ए सयोजिता

३ बी यथा

१ ए धीतिपरांप्राप्य

लक्ष्मी उवाच :- यदि दास्यति मे तुष्टा वरं देवी मनोगतम् ।।
तदिहस्थैर्यिता नित्यं श्रीमाले निर्मिते मया ।। ५८

देव्युवाच :- इह स्थितिं करिष्यामि तव चैत्रे हरिप्रिये ।।
सौभाग्य पुत्र संपत्तिं भक्तेभ्यो ददती सदा ।। ५९

वसिष्ठ उवाच :- इत्थ माभाषमाणाया गौर्यां देवः पुरान्तकः
तत्र त्रिशूलदंडेन स चकर्ष जलं भुवः ।।
अब्रवीच्च प्रियां प्रीतः सन्निधौ हरिसुभ्रुवः ।। ६०

देवदेव उवाच :- दिव्यं कुण्डमिदं यच्च त्वत्प्रियार्थं कृतं मया ।।
येत्र स्नानं करिष्यन्ति मनुजा भक्तिसंयुता: ।। ६१

न तेषां जातु दारिद्र्यं वियोगश्च न कान्तया ।
न दौर्भाग्यं न रोगाश्च न भविष्यत्य पुत्रता ।। ६२

बालारूपधरायास्त्वं श्रियस्तुष्टासि पार्वति ।।
ततस्त्वं बालगौरीतिनाम्नाख्याता भविष्यति ।। ६३

-०-

१ ए सन्निधाहरिसुभ्रुव :

या वै शुक्लतृतीयायां बालगौरीं स्त्रियः प्रिये ।।
अर्चयिष्यन्ति विधिवत्तासां लोका महोदयाः ।। ६४

वसिष्ठ उवाच :- इत्यालाप्य महादेवः पार्वतीं प्राणवल्लभाम् ।
श्रियमामन्त्रयामास सह शैल तनूजया ।। ६५

ते देव्यौ प्रीति संयुक्ते परिष्वज्य परस्परम् ।।
वरं दत्वा न्यवर्तेतां श्रीमाले देववत्सले ।। ६६

~~देवीकृत्वा~~ :- ततः सार्धं महेशेन देवी[1]कृत्वांशतः स्थितिम् ।।
श्रीमालाद्रिमुदिश्य प्रतस्थे गिरिनन्दिनी ।। ६७

क्षीरोदतनया चापि ययौ स्थानं यथागतम् ।।
ततः प्रभृति विख्याता बाल गौरी महेश्वरी ।। ६८

इदं गौर्या श्चलक्ष्म्याश्च संयोगं प्रीतियुक्तयोः ।।
हरस्यापि शिवायोगं यः शृणोति नरोत्तम ।। ६९

-०-

१ ए देवा

स वै मासकृतात्पापान्मुच्यते नात्र संशयः ॥
कीर्तिं च समवाप्नोति यावदाभूतसंप्लवम्[1] ॥ ७०

इति श्री स्कन्दपुराणे एकाशीतिसाहस्त्र्यां
संहितायां ब्राह्म विभागे तृतीयपरिच्छेदे श्रीमाल माहात्म्ये
बालगौरी माहात्म्यं नाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

-०-

१ बी यावदाहूतसम्प्लवम्